# सुन्दरकाण्ड पञ्चदशः सर्गः (१५) - ॥ सीतादर्शनम् ॥

स वीक्षमाणस् तत्रस्थो मार्गमाणश्च मैथिलीम् ।
अवेक्षमाणश्च महीं सर्वां तामन्व वैक्षत ॥ १ ॥

सन्तानकलताभिश्च पादपै रुपशोभिताम् ।
दिव्य गन्ध रसोपेतां सर्वतः समलङ्कृताम् ॥ २ ॥

तां स नन्दन सङ्काशां मृग पक्षिभि रावृताम् ।
हर्म्य प्रासाद सम्बाधां कोकिलाकुल निःस्वनाम् ॥ ३ ॥

काञ्चनोत्पल पद्माभिर् वापीभि रुपशोभिताम् ।
बह्वासन कुथोपेतां बहुभूमि गृहायुताम् ॥ ४ ॥

सर्वर्तु कुसुमै रम्यां फलवद्भिश्च पादपैः ।
पुष्पिताना मशोकानां श्रिया सूर्योदय प्रभाम् ॥ ५ ॥

प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत ।
निष्पत्र शाखां विहगैः क्रियमाणा मिवासकृत् ॥ ६ ॥

विनिष्पतद्भिः शतशश् चित्रैः पुष्पावतंसकैः ।
आमूल पुष्प निचितै रशोकैः शोक नाशनैः ॥ ७ ॥

पुष्प भाराति भारैश्च स्पृशद्भि रिव मेदिनीम् ।
कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः ॥ ८ ॥

स देशः प्रभया तेषां प्रदीप्त इव सर्वतः ।
पुन्नागाः सप्त पर्णाश्च चम्पकोद् दालकास् तथा ॥ ९ ॥

विवृद्ध मूला बहवः शोभन्ते स्म सुपुष्पिताः ।
शातकुम्भ निभाः केचित् केचि दग्नि शिखोपमाः ॥ १० ॥

नीलाञ्जन निभाः केचित् त्त्राशोकाः सहस्रशः ।
नन्दनं विविधोद्यानं चित्रं चैत्ररथं यथा ॥ ११ ॥

अतिवृत्त मिवाचिन्त्यं दिव्यं रम्यं श्रियावृतम् ।
द्वितीयमिव चाकाशं पुष्प ज्योतिर् गणायुतम् ॥ १२ ॥

पुष्प रत्न शतैश् चित्रं पञ्चमं सागरं यथा ।
सर्वर्तु पुष्पैर् निचितं पादपैर् मधु गन्धिभिः ॥ १३ ॥

नाना निनादै रुद्यानं रम्यं मृग गणैर्द्विजैः ।
अनेक गन्ध प्रवहं पुण्य गन्धं मनोरमम् ॥ १४ ॥

शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्ध मादनम् ।
अशोक वनिकायां तु तस्यां वानर पुङ्गवः ॥ १५ ॥

स ददर्शावि दूरस्थं चैत्यप्रासाद मुच्छ्रितम् ।
मध्ये स्तम्भ सहस्रेण स्थितं कैलास पाण्डुरम् ॥ १६ ॥

प्रवाल कृत सोपानं तप्त काञ्चन वेदिकम् ।
मुष्णन्त मिव चक्षूंषि द्योतमान मिव श्रिया ॥ १७ ॥

विमलं प्रांशु भावत्वा दुल्लिखन्त मिवाम्बरम् ।
ततो मलिन संवीतां राक्षसीभिः समावृताम् ॥ १८ ॥

उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः ।
ददर्श शुक्ल पक्षादौ चन्द्ररेखा मिवामलाम् ॥ १९ ॥

मन्दं प्रख्याय मानेन रूपेण रुचिर प्रभाम् ।
पिनद्धां धूम जालेन शिखामिव विभावसोः ॥ २० ॥

पीतेनैकेन संवीतां क्लिष्टे नोत्तम वाससा ।
सपङ्का मनलङ्कारां विपद्मा मिव पद्मिनीम् ॥ २१ ॥

व्रीडिताम् दुःख सन्तप्तां परिम्लानां तपस्विनीम् ।
ग्रहेणाङ्गारके णेव पीडितामिव रोहिणीम् ॥ २२ ॥

अश्रु पूर्ण मुखीं दीनां कृशा मनशनेन च ।
शोक ध्यान परां दीनां नित्यं दुःख परायणाम् ॥ २३ ॥

प्रियं जन मपश्यन्तीं पश्यन्तीं राक्षसी गणम् ।
स्वगणेन मृगीं हीनां श्वगणाभि वृतामिव ॥ २४ ॥

नील नागाभया वेण्या जघनं गतयैकया ।
नीलया नीरदापाये वनराज्या महीमिव ॥ २५ ॥

सुखार्हां दुःख सन्तप्तां व्यसनाना मकोविदाम् ।
तां समीक्ष्य विशालाक्षी मधिकं मलिनां कृशाम् ॥ २६ ॥

तर्कयामास सीतेति कारणै रुप पादिभिः ।
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा ॥ २७ ॥

यथा रूपा हि दृष्टा वै तथा रूपेय मङ्गना ।
पूर्ण चन्द्राननां सुभ्रूं चारु वृत्त पयोधराम् ॥ २८ ॥

कुर्वन्तीं प्रभया देवीं सर्वा वितिमिरा दिशः ।
तां नीलकेशीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम् ॥ २९ ॥

सीतां पद्म पलाशाक्षीं मन्मथस्य रतिं यथा ।
इष्टां सर्वस्य जगतः पूर्णचन्द्र प्रभामिव ॥ ३० ॥

भूमौ सुतनु मासीनां नियतामिव तापसीम् ।
निःश्वास बहुलां भीरुं भुजगेन्द्र वधूमिव ॥ ३१ ॥

शोक जालेन महता विततेन न राजतीम् ।
संसक्तां धूम जालेन शिखामिव विभावसोः ॥ ३२ ॥

तां स्मृतीमिव सन्दिग्धामृद्धिं निपतितामिव ।
विहतामिव च श्रद्धा माशां प्रति हतामिव ॥ ३३ ॥

सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव ।
अभूते नापवादेन कीर्तिं निपतितामिव ॥ ३४ ॥

रामोपरोध व्यथितां रक्षो हरण कर्शिताम् ।
अबलां मृग शाबाक्षीं वीक्षमाणां ततस्ततः ॥ ३५ ॥

बाष्पाम्बु परिपूर्णेन कृष्ण वक्राक्षि पक्ष्मणा ।
वदनेना प्रसन्नेन निःश्वसन्तीं पुनः पुनः ॥ ३६ ॥

मल पङ्कधरां दीनां मण्डनार्हा ममण्डिताम् ।
प्रभां नक्षत्र राजस्य कालमेघै रिवावृताम् ॥ ३७ ॥

तस्य सन्दिदिहे बुद्धिर् मुहुः सीतां निरीक्ष्य तु ।
आम्नायाना मयोगेन विद्यां प्रशिथिला मिव ॥ ३८ ॥

दुःखेन बुबुधे सीतां हनुमा ननलङ्कृताम् ।
संस्कारेण यथा हीनां वाच मर्थान्तरं गताम् ॥ ३९ ॥

तां समीक्ष्य विशालाक्षीं राजपुत्री मनिन्दिताम् ।
तर्कयामास सीतेति कारणै रुपपादिभिः ॥ ४० ॥

वैदेह्या यानि चाङ्गेषु तदा रामोऽन्व कीर्तयत् ।
तान्याभरण जालानि शाखा शोभीन् यलक्षयत् ॥ ४१ ॥

सुकृतौ कर्ण वेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ ।
मणि विद्रुम चित्राणि हस्तेष् वाभरणानि च ॥ ४२ ॥

श्यामानि चिर युक्तत्वात् तथा संस्थानवन्ति च ।
तान्ये वैतानि मन्येऽहं यानि रामोऽन्व कीर्तयत् ॥ ४३ ॥

तत्र यान् यवहीनानि तान्यहं नोपलक्षये ।
यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४४ ॥

पीतं कनक पट्टाभं स्रस्तं तद्वसनं शुभम् ।
उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः ॥ ४५ ॥

भूषणानि च मुख्यानि दृष्टानि धरणीतले ।
अनयै वापविद्धानि स्वनवन्ति महान्ति च ॥ ४६ ॥

इदं चिरगृहीतत्वाद् वसनं क्लिष्टवत्तरम् ।
तथापि नूनं तद्वर्णं तथा श्रीमद् यथेतरत् ॥ ४७ ॥

इयं कनक वर्णाङ्गी रामस्य महिषी प्रिया ।
प्रनष्टापि सती यास्य मनसो न प्रणश्यति ॥ ४८ ॥

इयं सा यत्कृते रामश् चतुर्भिः परितप्यते ।
कारुण्येना नृशंस्येन शोकेन मदनेन च ॥ ४९ ॥

स्त्री प्रनष्टेति कारुण्या दाश्रितेत्या नृशंस्यतः ।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च ॥ ५० ॥

अस्या देव्या यथा रूप मङ्ग प्रत्यङ्ग सौष्ठवम् ।
रामस्य च यथा रूपं तस्येय मसितेक्षणा ॥ ५१ ॥

अस्या देव्या मनस् तस्मिंस् तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्त मपि जीवति ॥ ५२ ॥

दुष्करं कृतवान् रामो हीनो यदनया प्रभुः ।
धारयत् यात्मनो देहं न शोके नावसीदति ॥ ५३ ॥

दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् ।
विना सीतां महाबाहुर् मुहूर्तमपि जीवति ॥ ५४ ॥

एवं सीतां तदा दृष्ट्वा हृष्टः पवन सम्भवः ।
जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥ ५५ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः ॥ १५ ॥